५४५८

॥ श्रीदधिमथी जयति ॥

# म्लेच्छीकृ(भू)तानां

# शुद्धिव्यवस्था ।

श्रीमन्महाराजाधिराजजम्बूकश्मीराद्यनेकदेशाधीशप्रभु-
वरश्रीरणवीरसिंहाज्ञप्तसारस्वतपण्डितोपना-
मदेवीदत्तसुतकविगङ्गारामसंगृहीतजम्बूमु-
द्रितधर्मशास्त्रमहानिबन्धान्तर्गतप्रायश्चित्त-
भागे ५४-७७ पृष्ठेषूपलब्धा,

लवपुरीयप्राच्यविद्यालयप्रधानाध्यापक-महामहो-
पाध्यायदाधिमथपण्डित**शिवदत्तशर्मणा**
संशोध्य

**मुम्बय्यां**
( खेतवाडी ७ वीं गली खम्बाटा लैन )
**श्रीवेङ्कटेश्वर-स्टीम्-मुद्रणयन्त्राल**
मुद्रापयित्वा प्रकाशिता ।

संवत् १९६९, शके १८३४.

श्रीदधिमथी जयति ।

# काश्मीरजम्बूतिब्बतादिनानादेशाधिपतिनास्तिक्य-
# मूलोत्पाटकमहाराजाधिराजश्रीयुतरणवीरसिंह-
# कारितधर्मशास्त्रसंग्रहान्तर्गतप्रायश्चित्तभागे
## म्लेच्छीभूतानां
# शुद्धिव्यवस्था ।

...क विरजानन्द दण्ड...
सन्दर्भ पुस्तकालय
ग्रहण क्रमांक ... ५४५८
दयानन्द महिला महा...

अथेदानीन्तनाः केचन जनाः प्रागतीव बलवद्भिर्भारतवर्षीयधर्माध्वविध्वंसनाय कृतावतारैरिव म्लेच्छापसदैरकारणं बलादेव स्वकीयान्नभोजनेन स्वकन्यादिसंबन्धविधानेन चैवंविधेनान्येनापि सद्यःपातित्यहेतुना स्वैः साकं शयनासनपानादिव्यवहारप्रवर्त्तनेनाऽवशतया स्वधर्मात्प्रच्याविताना तदात्वे तन्निदेशातिक्रमे सद्य एव सकलस्वान्वयनाशं निश्चित्य कालांतरसमुचितप्रायश्चित्ताचरणेन गुरुतरदुरितनिष्कृतिसंभावनया तथाविधायां गरीयस्यामापदि प्राणत्राणमेव परमं धर्मं मन्यमानानां चिरं तेषां बलीयस्तया तेभ्यः स्वात्मानं मोचयितुमवकाशमलब्ध्वा पुत्रपौत्रादिपारम्पर्येण तथैवावस्थितानां तत एव च म्लेच्छीभूतानां विप्रक्षत्रियविट्शूद्राणां कुलेषु प्रसूता म्लेच्छा वा स्वां नास्तिकतां विविधरौरवादिनिरयसाधनतया कुतश्चिदपि प्राग्भवीयसुकृतलेशपरिपाकोदितेन शिष्टवाक्यादिना दृढमवधार्य भृशमनुशयानाश्चेत् प्रणिपातमात्रपरितुष्टेभ्यो दीनजनानुकम्पया तदुद्धारायैव भगवता विधिना सृष्टेभ्यः स्वप्रार्थनाञ्जलिशताकृष्टेभ्यः शिष्टेभ्यः कथंचिदपि साध्वनुष्ठितेन प्रायश्चित्तादिना नरकतरणोपायं स्वोचितनिगमानुमतदेवतासमाराधनाद्युपदेशं च वारं वारं प्रणिपत्य प्रार्थयेरन्, तर्हि ते कथंचिदपि नास्तिक्यतो मुक्तिं स्वोचिताचारांश्चोपदेष्टुमर्हा न वा ?। अर्हाश्चेत्कीदृशं प्रायश्चित्तं जन्मतः प्रभृत्याश्रितनास्तिक्यदोषमोषकं, के च तदुचिता आचारा इति विमृश्यते ।

---

१ णिच्प्रकृत्यर्थमात्रे करणतयाऽन्वयाभिप्रायेण प्रयुक्तं भवेत् ।

तत्र येषां चातुर्वर्णिकानां प्राप्तस्वोचितसंस्काराणां बलात्स्वेच्छया वा म्लेच्छादिहीनजातिभिः संसर्गो नास्तिक्याद्याश्रयणं च । तेषां मनुयाज्ञवल्क्याद्युक्तप्रायश्चित्तैस्तत्संसर्गनास्तिक्यज—पापविनाशेन पुनः स्वस्ववर्णोचितधर्मप्राप्तिस्तु स्पष्टैव ॥ अयं तु विशेषः—तेषां संसर्गकालतारतम्यपर्यालोचनया लघुलघीयोगुरुगरीयःप्रायश्चित्तप्राप्तिः ॥ नास्तिक्यस्य तु वेदादिप्रामाण्याविश्वासरूपस्य "**नास्तिक्यं व्रतलोपश्च**" इत्युपपातकप्रकरणे पाठेन

**"उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा ।**
**पयसा वाऽपि मासेन पराकेणाथ वा पुनः ॥"**

इत्युक्तेषु प्रायश्चित्तेष्वन्यतमेन पापानुरूपेणोपदिष्टेन निष्कृतिः ॥ येषां त्वकृतसंस्काराणामेव तैः संसर्गो नास्तिक्याश्रयणं च, तेषामापदाऽप्राप्तसंस्काराणाम्

**"इत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।**
**सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः॥"**

इति मनूक्तेरापद्यपि व्रात्यत्वस्याऽपरिहार्यतया

**"अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः ।**
**सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥"**

इति विप्रक्षत्रियविशां क्रमेण षोडश—द्वाविंशति—चतुर्विंशतिसंवत्सराभ्यन्तरेऽनुपनीतानां व्रात्यतायाः पर्युदासमुखेन व्रात्यस्तोमरूपप्रायश्चित्ताऽपनोद्यत्वोक्तेः, तेन नास्तिक्यप्रायश्चित्तेन च नष्टपापानामस्त्येवोपनयनपूर्वकं स्वस्वधर्मप्राप्तिः ॥

**शूद्राणां** तु सावित्रीप्राप्तेरेवाऽभावेन तदभावप्रयोज्यत्वस्यैव व्रात्यत्वे प्रागुक्तवचनतोऽलाभाद्व्रात्यत्वप्रयुक्तप्रायश्चित्ताऽप्राप्तावप्यऽव्यवहार्यम्लेच्छादिस्पृष्टान्नभोजनादिमात्रप्रयुक्तप्रायश्चित्तस्य दिनगणनया कल्पितावृत्त्या नास्तिक्यस्य च चातुर्वर्णिकैः सर्वैरपि परिहार्यतया तदाश्रयणप्रयुक्तपापनाशकप्रायश्चित्तस्याचरणेन च वोचितधर्मप्राप्तिरुचितैव ॥

**त्रैवर्णिकानां** पञ्चदशवर्षाधिककालं गौणकालादूर्ध्वमनापद्यनुपनीतानां किंचित्कालमपि वाऽनापद्यनुपनीतानां "**पतितसावित्रीक उद्दालकव्रतं चरेत् द्वौ मासौ यावकेन वर्त्तयेत्, मासं पयसा, पक्षमामि-**

**क्षया,—ऽष्टरात्रं घृतेन, षड्रात्रमयाचितेन, त्रिरात्रमब्भक्षोऽहो-रात्रमुपवसेदश्वमेधावभृथं गच्छेद्व्रात्यस्तोमेन वा यजेत"** इति मिताक्षराधृत**वसिष्ठ**वचनेनोद्दालकव्रतव्रात्यस्तोमयोरन्यतरन्मनूक्तं त्रैमासिकं च क्रमेण कृतवतामुपनेयता मिताक्षरादौ स्पष्टैव ॥

येषां तु पिता, पितृपितामहौ, पितृपितामहप्रपितामहाश्चाऽनुपनीताः सवर्णास्वेव च व्रात्यजासु पुत्रानुत्पादितवन्तस्ते भृज्जकण्टकादिसंज्ञकाः । तदुक्तं मनुना—

**"व्रात्यात्तु जायते विप्रात्पापात्मा भृज्जकण्टकः ।**
**आवन्त्यवाटधानौ च पुष्पशेखर एव च ॥**
**विप्रायां जायते व्रात्यविप्रजो भृज्जकण्टकः॥"** इति ॥

अत्रेयं व्यवस्था—आवन्त्याद्यास्तस्यैव संज्ञा इति मेधातिथिः ॥ अन्ये तु भृज्जकण्टकाद्विप्रायामावन्त्यः । तस्मात्तस्यां वाटधानः । तस्माच्च तस्यां पुष्पशेखरः ॥ एवं **व्रात्यक्षत्रिया**त्क्षत्रियायाम्

**"झल्लो मल्लश्च राजन्याद्व्रात्याल्लिच्छिविरेव च ॥**
**नटश्च करणश्चैव खसो द्रविड एव च ॥"** इति झल्लादयः ॥
**"वैश्यात्तु जायते व्रात्यात्सुधन्वाऽऽचार्य एव च ।**
**कारूषश्च विजन्मा च मैत्रः सात्त्वत एव च ॥"**

इति सुधन्वादयो वैश्याजा एव । इदं च शूद्रकमलाकरे स्पष्टम् । एषां च व्रात्यत्वेऽपि विप्रत्वादिकं न हीयते, विप्रत्वादेर्जातिरूपतया विप्रजातीयपुरुषाद्विप्रजातीयकन्यायामुत्पन्नापत्यमात्रस्य विप्रत्वात्, तत्र चादुष्टत्वस्याप्रयोजकत्वात् ॥ अतश्च तेषां विप्रत्वादेरनपगमात् **"अतिक्रान्ते तु सावित्र्याः काल ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत् । अथोपनयनं ततः संवत्सरमुदकोपस्पर्शनमथाध्याप्यो, यस्य पिता पितामह इत्यनुपनीतौ स्यातां ते ब्रह्महसंस्तुताः तेषां गमनं भोजनं विवाहमिति वर्जयेत् । तेषामिच्छतां प्रायश्चित्तं यथा प्रथमेऽतिक्रम ऋतुरेव संवत्सरोऽथोपनयनम् तत उदकोपस्पर्शनम् प्रति-**

**पुरुषसंख्यया संवत्सरान् यावन्तोऽनुपनीताः स्युः सप्तभिः पावमानीभिर्यदन्ति यच्च दूरक इत्येताभिर्यज्ञपवित्रेण सामपवित्रेणांगिरसेनेत्यपि वा व्याहृतिभिरेवमथाध्याप्योऽथ यस्य प्रपितामहादीनां नानुस्मर्यत उपनयनं ते श्मशानसंस्तुताः तेषामभ्यागमं भोजनं विवाहमिति वर्जयेत् तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यं ब्रह्मचर्यं चरेदथोपनयनम् तत उदकोपस्पर्शनं पावमान्यादिभिरथ गृहमेधेनाऽध्यापनम् ततोऽभिनिवर्त्तते तस्य यथा प्रथमेऽतिक्रमे तत ऊर्ध्वं प्रकृतिवत्''** इति प्रायश्चित्तमयूख—प्रायश्चित्तोद्द्योत—प्रायश्चित्तमुक्तावल्यादिबहुतरप्राचीनमान्यनिबन्धधृता**पस्तम्ब**वचनानुसारिप्रायश्चित्ताचरणेन निर्णिक्तपातकानामुपनयनपूर्वकस्वस्ववर्णोचितधर्म्मप्राप्तिरस्त्येव ॥

**शूद्राणां** तु पूर्ववदेव तेषां व्रात्यत्वप्रयुक्तस्य पापविशेषस्याऽभावात् ॥ अतः परं च वृद्धप्रपितामहमारभ्य येषां जनकानामुपनयनाऽभावः तेषां सवर्णास्वेवोत्पादितापत्यानामपि न प्रायश्चित्तस्य गुरुतरस्याप्याचरणेनोपनयनप्रभृतिवैदिकसंस्कारयोग्यता, आपस्तम्बेन चतुर्थपुरुषावध्येव व्रात्यत्वे प्रायश्चित्ताभिधानात् ॥

न चाऽऽपस्तम्बेन **''यस्य प्रपितामहादीनां नाऽनुस्मर्यत उपनयनम्''** इत्युपक्रम्य प्रायश्चित्ताभिधानात् तत्र चादिग्रहणेन ततः प्राचामप्यनुपनीतत्वे प्रायश्चित्तेन व्रात्यत्वनाशो युक्त एवेति—वाच्यम्,

उक्तवचनं व्याचक्षाणेन भाष्यकृता हरदत्तेन **'प्रपितामहादि प्रपितामहादारभ्य प्रपितामहः पितामहः पिता स्वयं च यथाकालमिति ते तथाविधाः समाणवकाः श्मशानतुल्याः'** इत्यादि व्याख्याय **'यस्य तु प्रपितामहस्य पितुरारभ्य नाऽनुस्मर्यत उपनयनं तत्र प्रायश्चित्तं नोक्तम्'** इत्युपसंहारात् । परं त्वेतेषां सवर्णाजत्वेन प्रागुक्तरीत्या विप्रत्वाद्यनपायाच्छूद्राऽपेक्षयोत्कृष्टत्वमस्तीति युक्तम् ॥ किंचैषामध्ययनाङ्गोपनयनप्राप्त्यभावेऽपि ।

**"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।**
**वेदमध्यापयेच्चैनं शौचाचारांश्च शिक्षयेत्"** इति वचनेन शौचाचारशिक्षणस्याऽप्युपनयनाङ्गितायाः सिद्धेस्तदङ्गोपनयनप्राप्तिरस्त्येव ॥ तच्च स्वसमीपप्रापणमात्ररूपमिति बोध्यम् ॥ न च—

**"निषेकादिश्मशानान्तो मंत्रैर्यस्योदितो विधिः ।**
**तस्य शास्त्रेऽधिकारोऽस्मिञ्ज्ञेयो नान्यस्य कस्यचित्॥"**

इति मनुना समन्त्रकश्मशानान्तविधिमतामेव शास्त्रोक्तानुष्ठानाधिकारो बोधितः । व्रात्यजानां पुनः संकरजातीयप्रकरणमध्ये पाठात्तत्समानधर्मत्वप्रतिपादने तात्पर्यावगमात् तेषां च

**"शूद्राणां च सधर्माणः सर्वेपध्वंसजाः स्मृताः"**

इत्यनेन शूद्रसधर्मत्वबोधनात् **"स्त्रीशूद्राणाममन्त्रकम्"** इति वचनेन तेषां मन्त्राधिकाराभावबोधनात् कथमुपनयनपूर्वकशौचाचारशिक्षणप्राप्तिरिति वाच्यम् । निषेकादिवाक्ये मन्त्रपदेन नाममन्त्रस्याऽपि ग्रहणात् ।

**"द्विजानां षोडशैवस्युः शूद्र स्य द्वादशैव हि ।**
**पञ्चैव मिश्रजातीनां संस्काराः कुलधर्मतः ॥**
**वेदव्रतोपनयनमहानाम्नीमहाव्रतम् ।**
**विना द्वादश शूद्राणां संस्कारा नाममन्त्रतः॥"** इति शूद्रकमलाकरधृतवचनेन तेषां नाममन्त्राधिकारित्वबोधनात् ॥ अत्र चोपनयनशब्देनाऽध्ययनाङ्गमेवोपनयनं विवक्षितं, पूर्वोत्तरसाहचर्यात् । अत एव महामहोपाध्याय **गागाभट्ट**कृतनिबन्धे व्रात्यादीनां शौचाचारशिक्षणाङ्गोपनयनप्राप्त्युक्तिः संगच्छते । तत्र निषेकादिवचनेन शास्त्रोक्तसकलधर्माधिकारस्यैव नियमाच्च विप्रस्याप्यापत्तारतम्येन हीनजातिधर्माश्रयणस्याभिधानात् । अत एव

**"देशधर्माञ्जातिधर्मान्कुलधर्मांश्च शाश्वतान् ।**
**पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान्मनुः॥"**

इति संगच्छते ॥ अन्यथा पाषण्डानां मन्त्रपूर्वकसंस्काराभावेनोपक्रमविरोधः स्पष्ट एव ॥ **"स्त्रीशूद्राणाममन्त्रकम्"** इत्यस्य च वैदिकमन्त्ररहितमित्यर्थेन

विरोधाभावात्, **शास्त्रेऽधिकार** इत्यनेन शास्त्राध्यापनाधिकारस्य विवक्षेण दोषलेशस्याप्यभावाच्च । अतश्च तेषां प्रपितामहप्राक्कालप्रभृत्यनुपनीतानां व्रात्यत्वानपगमेऽपि शूद्रसमानधर्मतया नास्तिक्यम्लेच्छसंसर्गपरिहारपूर्वकमुचित-प्रायश्चित्तेन शुद्धानामस्ति प्रागुक्तद्वादशसंस्कारप्राप्तिः । येषां पुनश्चातुर्वर्णिकज-त्वनिश्चयोऽपि नास्ति चिरं म्लेच्छादिभिः संसर्गात्, तेषामप्यस्ति पश्चात्तप्य-मानानां नास्तिक्यपरिहारपूर्वकमास्तिक्याश्रयणेन भक्तिशास्त्राद्यधिकारोऽहिं-सादिसामान्यधर्मप्राप्तिश्च । तथाहि **"आनिन्द्ययोन्यधिक्रियते पारं-पर्यात् सामान्यवत्"** इति भक्तिसूत्रे द्वितीयाध्याये द्वितीयाह्निकेऽष्टसप्ततितमं सूत्रम् । अस्य चार्थो भाष्यकृता **स्वप्नेश्वरेणै**वं विवृतः–निन्दितचाण्डालादियो-निपर्यन्तं भक्तावधि क्रियते संसारदुःखजिहासाया अविशेषात् । अथ वेदाध्ययनानधि-कारात् कथमत्रैवर्णिकानां स इति चेत्तत्राह–**परम्पर्या**दिति । **"चोदनालक्ष-णोऽर्थो धर्मः" शास्त्रयोनित्वात्** इतिन्यायादलौकिकोऽर्थः श्रुत्यैकसमधि-गम्य इत्यत्र न विप्रतिपद्यामहे । किन्तु स्त्रीशूद्रादीनामितिहासपुराणादिद्वारा चाण्डालादीनां च स्मृत्याचारवदुपदेशपारम्पर्येण ज्ञानमपि श्रुतिमूलमेव भवति । यथा तेषां सामान्याऽहिंसाधर्मादि-ज्ञानम्, अन्यथा तदसिद्धिप्रसङ्गादिति ॥ अनेन च सूत्रभाष्यसंदर्भेण स्पष्ट एव मनुष्यमात्रस्य भक्तिशास्त्राधिकारः । एवं प्रत्यभिज्ञा-शास्त्रेऽपि 'जनस्य' इत्युक्त्या जन्ममरण–प्रयुक्तक्लेशजिहासावतः प्राणिमात्रस्य मित्युक्तेः तत्राप्यधिकारः । तथा–

**"शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।**
**वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥ १ ॥**
**पौण्ड्रकाश्चौण्ड्रद्रविडाः काम्बोजा यवनाः शकाः ॥**
**पारदाः पल्हवाश्चीनाः किराता दरदाः खसाः ॥ २ ॥**
**मुखबाहूरुपज्जानां या लोके जातयो बहिः ।**
**म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥ ३ ॥"**

इति मनुना दस्युशब्देन व्यवहृतानां व्रात्यक्षत्रियादीनां धर्मे व्यवस्थापनं कथं ग्रहणस्यादिति राजधर्मेषु पञ्चषष्टितमाध्याये–

"यवनाः किराता गान्धाराश्चीनाः शबरबर्बराः ॥
शकास्तुषाराः कंकाश्च पह्लवाश्चान्ध्रमद्रकाः ॥ १ ॥
पौण्ड्राः पुलिन्दा रमठाः काम्बोजाश्चैव सर्वशः ॥
ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः ॥ २ ॥
कथं धर्मांश्चरिष्यन्ति सर्वे विषयवासिनः ॥
मद्विधैश्च कथं स्थाप्याः सर्वे वै दस्युजीविनः ॥ ३ ॥
एतदिच्छाम्यहं श्रोतुं भगवंस्तद् ब्रवीहि मे ॥
त्वं बन्धुभूतो ह्यस्माकं क्षत्रियाणां सुरेश्वर ॥ ४ ॥"

इति मान्धातुरिन्द्रं प्रति प्रश्ने—

"मातापित्रोर्हि शुश्रूषा कर्त्तव्या सर्वदस्युभिः ॥
आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनाम् ॥ १ ॥
भूमिपानां च शुश्रूषा कर्त्तव्या सर्वदस्युभिः ॥
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ॥ २ ॥
पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च ॥
दानानि च यथा कालं द्विजेभ्यो विसृजेत्सदा ॥ ३ ॥
अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम् ॥
भरणं पुत्रदाराणां शौचमद्रोह एव च ॥ ४ ॥
दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता ॥
पाकयज्ञा महार्हाश्च दातव्या सर्वदस्युभिः ॥ ५ ॥
एतान्येवंप्रकाराणि विहितानि पुराऽनघ ॥
सर्वलोकस्य कर्माणि कर्त्तव्यानीह पार्थिव ॥ ६ ॥"

इति इन्द्रस्योत्तरेण मातापितृशुश्रूषादेर्लिङ्तव्याभ्यां विधानादिमे धर्मा इति स्पष्टमेव । तत्र—

"उपनीय तु यः शिष्यं वेदमध्यापयेद्बुधः ॥
सांगं च सरहस्यं च तमाचार्यं प्रचक्षते ॥ १ ॥"

इति लक्षितस्य वेदाध्यापकस्याचार्यस्यासंभवेऽपि उपनयनपूर्वकशौचाचारशिक्षणकर्त्तैवाऽऽचार्यपदेनाभिधीयते । एवं गुरुपदेनापि—

"निषेकादीनि कर्माणि यः करोति यथाविधि ।
संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥"

इति पारिभाषिकस्य गुरोरसंभवेऽपि—

"गुशब्दस्त्वन्धकारः स्याद्रुशब्दस्तन्निरोधकः ॥
अन्धकारविरोधित्वाद्गुरुरित्यभिधीयते ॥"

इति लक्षितो योग्यमन्त्रादिदानेन निरयरूपान्धकारनिवर्त्तको गुरुरिह गृह्यते । न चैषां कस्मिन्नपि मन्त्रे नाधिकार इति वाच्यम्, अगस्त्यसंहितायाम्—

"शुचिव्रततमाः शूद्रा धार्मिका द्विजसेवकाः ॥
स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः ॥ १ ॥
लोकाश्चाण्डालपर्यन्तं सर्वेप्यत्राधिकारिणः ॥"

इत्यादिना राममन्त्रे मनुष्यमात्रस्याधिकारबोधनात् । तथा—

"श्रुतिर्ब्रह्माह षड्वर्णं स्मृतिर्वर्णद्वयात्मकम् ॥
षड्वर्णं ब्राह्मणादीनां त्रयाणां यद् द्विवर्णकम् ॥ १ ॥
तदन्येषां देशिकेन वक्तव्यं तारकं परम् ॥"

इत्यनेन त्रैवर्णिकानाम् '**ॐ रामाय नमः**' इति षड्वर्णे पूर्ववाक्यैकवाक्यतया तदन्येषां सर्वेषामपि मनुष्याणां रामनाममन्त्रेऽधिकारावगमाच्च । एवं ब्रह्मोत्तरखण्डे शिवपञ्चाक्षरं प्रक्रम्य—

"महापातकदावाग्निः सोऽयं मन्त्रः षडक्षरः ॥
प्रणवेन विना मन्त्रः सोऽयं पञ्चाक्षरो मतः ॥ १ ॥
स्त्रीभिः शूद्रैश्च संकीर्णैर्धार्यते मुक्तिकांक्षिभिः ॥
नास्य दीक्षा न होमश्च न संस्कारो न तर्पणम् ॥ २ ॥
न कालनियमश्चात्र जप्यः सर्वैरयं मनुः ॥
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥ ३ ॥"

इत्यनेन शिवपञ्चाक्षरमन्त्रे म्लेच्छादीनामप्यधिकारस्य विस्पष्टमवगतेश्च ॥

'**वेद धर्मक्रिया**' इत्यनेन वेदमूलकस्मृत्याद्युक्तशिवविष्ण्वादिभक्तिसमाश्रयाणमुच्यते

"मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ॥
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥"

इति भगवद्गीतासु भगवता स्वसमाश्रयणाभिधानात् । अत एव स्कन्द-पुराणेऽपि—

**"विष्णुभक्तिसमायुक्तो मिथ्याचारोप्यनाश्रमी ॥**
**पुनाति सकलाँल्लोकान् सहस्रांशुरिवोदितः ॥ १ ॥**
**ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः ॥**
**विष्णुभक्तिसमायुक्तो ज्ञेयः सर्वोत्तमोत्तमः ॥ २ ॥**
**दुराचारोऽपि सर्वाशी कृतघ्नो नास्तिकः पुरा ॥**
**समाश्रयेदादिदेवं श्रद्धया शरण हि यः ॥ ३ ॥**
**निर्दोषं विद्धि तं जन्तुं प्रभावात्परमात्मनः ॥"**

इति पठ्यते ॥ एवं देवीपुराणे—

**"वर्णाश्रमविभागेन देवाः स्थाप्यास्तु नान्यथा ॥**
**ब्रह्मा तु ब्राह्मणैः स्थाप्यो गायत्रीसहितः प्रभुः ॥ १ ॥**
**चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ॥**
**भैरवोऽपि चतुर्वर्णैरन्त्यजानां तथा मतः ॥ २ ॥"**

इति वचनेनान्त्यजादीनामपि भैरवप्रतिष्ठाधिकारः स्पष्टमुच्यते ॥ भगवद्भक्तेः सर्वमानुषेष्वनुमतत्वादेव च—

**"किरातहूणान्ध्रपुलिन्दपुल्कसा**
**आभीरकङ्का यवनाः खसादयः ॥**
**येऽन्ये च पापा यदुपाश्रयाश्रयाः**
**शुध्यन्ति तस्मै प्रभविष्णवे नमः ॥"**

इति भागवते २ । ४ । १८ सर्वेषां भगवद्भक्त्या शुद्ध्यभिधानं संगच्छते ॥ राममंत्रपञ्चाक्षरमंत्रयोः सर्वेषामधिकारः प्राङ् निरूपित एव ॥ पितृयज्ञादयश्च नास्तिक्यम्लेच्छसंसर्गपरिहारपूर्वकमुचितप्रायश्चितानुष्ठानेन शुद्रानां शूद्रकमलाकरोक्तप्रयोगानुसारिणः प्राप्नुवन्ति । तेषां शूद्रसधर्मत्वात् । एवं चोपपादितसंदर्भेण मूलतो म्लेच्छादीनामपि स्वनास्तिक्यादित्यागपूर्वकराममंत्राद्यधिकारः सिध्यति किं पुनर्बलान्म्लेच्छीकृतानाम् ॥ मा भून्नाम चिरकालनास्तिकम्लेच्छसंसर्गादनि-

श्वीयमानस्वस्वजातिकानां प्रायश्चित्तादिभिः सद्य एव वर्णाश्रमान्तर्गतत्वं साक्षात्परं परया वा मुक्तिसाधनतया सकलसंसारदावदाहशमकं भगवद्भक्त्याश्रयणं तु कथं निवार्यताम् ॥ किंच—

**"श्रद्दधानः शुभां विद्यामाददीतावरादपि ॥**
**अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥ १ ॥"**

इति वदता मनुना नीचादपि समीचीनधर्मग्रहणमनुमतम् ॥ तेन दण्डापूपिकनीत्यैव श्रेष्ठात्स्वोचितधर्मप्राप्तिर्नीचानामपि सिध्यति,

**"गार्भैर्होमैर्जातकर्मचौलमौञ्जीनिबन्धनैः ॥**
**बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ॥"**

इति वचनेनाऽभक्ष्यभक्षणजनितत्वादिनिषिद्धकालगमनादिवत्प्रायश्चित्ततारतम्येन क्रमायातदोषाणामपि नाशस्योपलक्षणविधया बोधनाच्च । अत एव पातकविशेषेण पतितानामपि पुनः संस्कारविधानमुपपद्यते । तेन पातकेन ब्राह्मणत्वादेर्नाशे हि संस्कारविध्युद्देश्यतावच्छेदकस्यैवाभावेन तद्विधानानुपपत्तिः । किंच, मलादिभिश्चिरं संसष्टस्यापि सुवर्णस्य संस्कारसंख्यातारतम्येन शुद्धितारतम्यदर्शनात् पापानामपि प्रायश्चित्ततारतम्येन शुद्धितारतम्यस्य यौक्तिकतया निर्दिष्टपापिनामपि सकलपापत्यागपूर्वकं चातुर्वर्णिकत्वाद्यसिद्धावपि शुद्धिसोपानारोहाधिकारो युक्त एव । अत एव—

**"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।**
**एकरात्रोपवासश्च श्वपाकमपि शोधयेत् ॥ १ ॥**

इति हारीतेनोक्तम् ॥ यद्यपि नेदं स्वार्थे तात्पर्यवद् अपिघटितत्वात्, तथापि शुद्धिः सर्वेषामपि भवत्युचितप्रायश्चित्तैरित्युपलक्षणविधया बोधयत्येव ॥ एतेन न हि शतशो ध्मायमानोऽपि लोहः सुवर्णं भवति । एवं म्लेच्छीभूतानां न कथमपि प्रायश्चित्तैः पापनाश इति प्रत्युक्तम् ॥ सद्यःस्तदभावेऽपि क्रमेण चातुर्वर्णिकधर्मयोग्यतासंभवेनैव प्रकृतार्थसिद्धेः । म्लेच्छीभूतानामपि ब्राह्मणत्वाद्यनपगमस्याधस्तादुपपादनेन दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्याच्च । अत एव भविष्ये रहस्यप्रसङ्गे—

**तथा दद्याद्विधानेन द्विजाय मधुसर्पिषी ॥**
**तारयत्यखिलान् पूर्वानात्मानं च नराधिप ॥ १ ॥**

गोभिश्चतसृभिर्युक्तं तथा भूमिसमन्वितम् ॥
प्रतिग्रहसमर्थाय विदुषे त्वाहिताग्नये ॥ २ ॥
दत्त्वाजिनं तु कार्त्तिक्यां वैशाख्यां वा विशेषतः ॥
विषुवत्ययने चैव ग्रहणे चन्द्रसूर्ययोः ॥ ३ ॥
कृच्छ्रात्तु तमसो घोरान्मुच्यते सर्वतो भयात् ॥
अतीतान् सप्त पुरुषांस्तथा चान्याननागतान् ॥ ४ ॥
उद्धृत्य स नरो याति ब्रह्मलोकं सनातनम् ॥

इत्यादिनाऽतीतसकलस्ववंशीयानामात्मनश्च तारणाभिधानं दृश्यते ॥ एवम्—

"एकादशगुणान् वाऽपि रुद्रानावार्य धर्मवित् ॥
महापापैरुपस्पृष्टो मुच्यते नात्र संशयः ॥ १ ॥"

इत्यङ्गिरोवचनम् । एवं तीर्थप्रत्याम्नाये विष्णुपुराणम्—

"ज्ञानतोऽज्ञानतो वाऽपि भक्त्याभक्त्याऽपि वा कृतम् ॥
गंगास्नानं सर्वविधं सर्वपापप्रणाशनम् ॥ १ ॥
चान्द्रायणसहस्रैस्तु यश्चरेत्कायशोधनम् ॥
पिबेद्यश्चापि गंगाम्भः समौ स्यातां न वा समौ ॥ २ ॥
भवन्ति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात् ॥
गंगाया दर्शनात्तद्वत्सर्वपापैः प्रमुच्यते ॥ ३ ॥
पुण्यक्षेत्राभिगमनं सर्वपापप्रणाशनम् ॥
देवताभ्यर्चनं पुंसामशेषाऽघविनाशनम् ॥ ४ ॥"

इति ।भविष्येपि—

"स्नानमात्रेण गंगायाः पापं ब्रह्मवधोद्भवम् ॥
दुराधर्षं कथं याति चिन्तयेद्यो वदेदपि ॥ १ ॥
तस्याहं प्रवदे पापं ब्रह्मकोटिवधोद्भवम् ॥
स्तुतिवादमिमं मत्वा कुम्भीपाकेषु जायते ॥ २ ॥
आकल्पं नरकं भुक्त्वा ततो जायेत गर्दभः ॥"

इत्यादिवचनैः श्रीगङ्गातीर्थस्नानादेः सकलपापनाशकता सिध्यति ॥ एवं बृहन्नारदीये सर्वसाधारणप्रायश्चित्तानि प्रोक्तानि—

"प्रायश्चित्तानि यः कुर्यान्नारायणपरायणः ॥
तस्य पापानि नश्यन्ति अन्यथा पतितो भवेत् ॥ १ ॥
यस्तु रागादिनिर्मुक्तो ह्यनुतापसमन्वितः ॥
सर्वभूतदयायुक्तो विष्णुस्मरणतत्परः ॥ २ ॥
महापातकयुक्तो वा युक्तो वाप्युपपातकैः ॥
सर्वैः प्रमुच्यते सद्यो यतो विष्णुरतं मनः ॥ ३ ॥"

इत्यादिना विष्णुभक्तस्य नरमात्रस्य सकलपापनाशोऽभिहितः। इत्थं च बहुत्र प्रायश्चित्तविधायकवचनेषु '**नर**' इति सामान्यपदोपादानादुदाहृतवचनैर्म्लेच्छादीनामपि भगवद्भक्त्यधिकारसिद्धेश्च सर्वेषामपि स्वाधिकारस्वयोग्यतानुसारेण वैदिकमार्गोन्मुखत्वं निराबाधं सिध्यति। इत्थं च त्रिपुरुषावधिनिश्चितसवर्णोत्पत्तिकानां कामतोऽकामतो वा म्लेच्छैः संसृष्टानां प्रायश्चित्ताचरणेन पुनः स्वस्ववर्णान्तर्गतत्वपूर्वकधर्मप्राप्तिः। तदन्येषामपि व्रात्यतमानां मूलतो म्लेच्छादीनां वा सत्यामिच्छायां नास्तिक्यत्यागेन भक्तिशास्त्रप्रत्यभिज्ञाशास्त्ररामसंत्राद्युपदेश्यताधिकारः शूद्रकमलाकरोक्तसंस्कारादिप्राप्तिश्च सिध्यतीत्यत्र न कस्यचित्कटाक्षावसर इति सकलश्रुतिस्मृतिपुराणेतिहासपर्यालोचननिर्गलितो विमर्शो निष्पक्षपातधीभिः सुधीभिर्निपुणं विचारणीय इति दिक् ॥

इत्युपदर्शितव्यवस्थानुसारेण निर्गलितोऽर्थः—

आर्यत्वाविर्भावेच्छायां पूर्वं मनस्तापः ततो म्लेच्छत्वाभिमानजिहासा, ततो म्लेच्छत्वापवादाभिमानजिहासया प्रायश्चित्तचिकीर्षया श्रुतिस्मृतिपुराणवाक्येषु विश्वासपूर्वकं प्रायश्चित्तोपदेष्टृवाक्येऽतीव विश्वासेन प्रायश्चित्तोपदेष्टॄणामुपासना, ततश्च तदुपदिष्टानां मनस्तापोपवासगङ्गास्नानपूर्वकं भक्तिशास्त्रप्रदर्शित—राम—कृष्ण—शिवमन्त्राणां दीक्षया संभवत्येवम्लेच्छत्वमलापाकृत्या स्वस्वनिष्ठार्यत्वजात्याविर्भावः ॥

॥ इतिशम् ॥

---

पुस्तक मिलनेका ठिकाना—

**महामहोपाध्याय-पं०-शिवदत्तशर्मा,**

ओरिएण्टल कालेज, लाहौर।

गुरुकुल कांगड़ी
सन्दर्भ पुस्तकालय
पु. परिग्रहण क्रमांक 4846
दयानन्द महिला महाविद्यालय



गुरु विरजानन्द दण्डी
सन्दर्भ पुस्तकालय
पु. परिग्रहण क्रमांक ............... 1055
दयानन्द महिला म. [illegible], कुरुक्षेत्र

; west have helped in making Hindu weddings more simple and dignified what they were at the beginning of the present century.

## POLITICS:

ʼami Dayanand who had toured India extensively for sixteen years in his :h for truth had seen the religious, social and political decline of the coun-

; started to build a new India. He awakened the spirit of a free ıerland, political freedom from British domination, and a national ıage to unify the people of India.

the 19th Century most of the militant revolutionaries who opposed the sh in northern India were mainly from the Arya Samaj fold and later in in the non-violent struggle of Mahatma Gandhi the Arya Samaj was the to give him support in large numbers.

ayanand was the first to introduce the word SWARAJ and a rejection of ;s, customs and practices that were British. Mahatma Gandhi and the In- National Congress took the same stand with much greater force in later s.

## EDUCATION

ATIONAL EDUCATION: The policy of the British Government was to ate the people of India in English so that they may serve the Government ɔod clerks. The Arya Samaj was the first to oppose this policy and raised oice for national education in the country.

lthough Dayanand was a Gujurati he was very practical and chose Hindi ıe most acceptable national language.

ıe first national education institution in India was the Gurukul Kangdee it was established by the Arya Samaj.

DUCATION BODIES: Dayanand Anglo-Vedic Schools and colleges established and night classes were also started. Arya Samajes in South :a, Mauritius, East Africa, Trinidad, Suriname, Guyana and Fiji built ols in their respective areas and maintained them at great sacrifice so that work of education may go on all over.

UCATION OF WOMEN: At a time when women were debarred from ing the Arya Samaj established schools, colleges and gurukulas for girls. ıing classes were instituted to cater for adults and a great amount of field was done to urge parents to educate their girls.

## WELFARE

he Arya Samaj is the foremost of the Hindu organisations to take a very e part in the welfare of the needy.

any orphanages have been established to care for orphaned children and lren from broken homes brought about by the separation of parents.

omes for widows and homes for the aged were established and residences Vanprasthi and ashrams for sadhus and sannyasis were also set up. As : Care centres for cows (gaushalas) and animals.

utside India children's homes and homes for the aged are run by Arya ajes in South Africa , East Africa, Mauritius and Suriname.

## MISSIONARY WORK

In the nineteenth century thousands of Indians went to fo work. Many of them did not return to their homeland because tracisation and settled in the country of their indenture. Due to cumstances many became Muslims and Christians.

The first Hindu missionaries to go to the countries where Hind ed outside India were of the Arya Samaj.

Vedic missionaries were trained at the Arya Samaj guru propagation of the Vedic religion. The beginning of the present ce Vedic missionaries go outside India and for a few decades Vedic m were the only Hindus engaged in this field of propagation and prea the Hindu Dharma in and outside India.

They helped to foster and maintain the Hindu religion and cultu Africa, East Africa, Mauritius, Fiji, Guyana, Suriname, Trinidad a In recent years United Kingfom, USA Canada, European and othe are also being visited by the Vedic missionaries.

**ASSIMILATION OF NON-HINDUS:** Many Hindus who ha Christians and Muslims were denied the opportunity of becomi again. The Arya Samaj opened the doors of Hinduism to all. Thos drifted away from the Hindu faith and also others were assimilat Hindu fold.

In recent months thousands of Hindus who were lured away faith were brought back to become Hindus again by the Arya Sa ment in India.

## CONCLUSION

Swami Dayanand and the Arya Samaj movement have thus initi activities and revived ancient Vedic teachings to awaken and revita society and aim for a common international brotherhood.

This can be achieved by the acceptance of the Vedic Tenets wh the good of the whole world and which only can bring universal and peace.


RELIGIOUS EXAMINATIONS

In order to arouse interest in Hindu Religious Knowledge, the Veda Niketan is conducting religious examinations in English as follows:-

1. Dharma Prathamā (Elementary) 2. Dharma Pravesh (Junior)
3. Dharma Prakāsh (Intermediate) 4. Dharma Praveen (Senior)
5. Dharma Prabhākar (Diploma)

Any individual can write these examinations. Certificates will be awarded to successful candidates.

All Hindu institutions are earnestly requested to organise religious classes for the above examinations at their schools, Sunday Services or at any other convenient time and place. An hour or two per week will be sufficient to cover the syllabus.

It is hoped that students, men and women, young and old will commence preparing for these religious examinations.

For further particulars, write to:-
The Secretary, Veda Niketan, 35 Cross Street, Durban 4001.